Siddhivinayaka Shodashopachara Pujastutih 1

सिद्धिविनायकषोडशोपचारपूजास्तुतिः १

Document Information

Text title : Siddhivinayaka Shodashopachara Pujastutih 1

File name : siddhivinAyakaShoDashopachArapUjAstutiH1.itx

Category : ganesha, pUjA, ShoDasha, stuti

Location : doc_ganesha

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4

Latest update : October 10, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 10, 2026

sanskritdocuments.org

सिद्धिविनायकषोडशोपचारपूजास्तुतिः १

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ १॥

एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं देवं वन्दे सिद्धिविनायकम् ॥ २॥

वन्दे गजाननं देवं तप्तकाञ्चनसन्निभम् ।
चतुर्भुजं महाकायं सर्वाभरणभूषितम् ॥ ३॥

अत्रागच्छ जगद्वन्द्य सुरराजार्चितेश्वर ।
अनाथनाथ सर्वज्ञ गीर्वाणासुरपूजित ॥ ४॥

अनेकरत्नखचितं मुक्तामणिविभूषितम् ।
रत्नसिंहासनं चारु गणेश प्रतिगृह्यताम् ॥ ५॥

गौरीपुत्र नमस्तेऽस्तु दूर्वापद्मादिसंयुतम् ।
भक्त्या पाद्यं मया दत्तं गृहाण द्विरदानन ॥ ६॥

सिद्धार्थ यवदूर्वाभिः गन्धपुष्पाक्षतैर्युतम् ।
तिलपुष्पसमायुक्तं गृहाणार्घ्यं गजानन ॥ ७॥

कर्पूरागरुपुष्पैश्च वासितं विमलं जलम् ।
भक्त्या दत्तं मया देव कुरुष्वाचमनं प्रभो ॥ ८॥

दध्याज्यमधुसंयुक्तं मधुपर्कं मयाऽऽहृतम् ।
गृहाण सर्वलोकेश गजवक्त्र नमोऽस्तु ते ॥ ९॥

मध्वाज्यशर्करायुक्तं दधिक्षीरसमन्वितम् ।
पञ्चामृतं गृहाणेदं भक्तानामिष्टदायक ॥ १०॥

गङ्गादिपुण्यपानीयैः गन्धपुष्पाक्षतै र्युतैः ।
स्नानं कुरुष्व भगवन् उमापुत्र नमोऽस्तु ते ॥ ११॥

रक्तवस्त्रद्वयं देव राजराजादिपूजित ।
भक्त्या दत्तं गृहाणेदं भगवन्हरनन्दन ॥ १२॥

राजतं ब्रह्मसूत्रं च काञ्चनं चोत्तरीयकम् ।
गृहाण चारु सर्वज्ञ भक्तानामिष्टदायक ॥ १३॥

चन्दनागरुकर्पूरकस्तूरीकुङ्कुमान्वितम् ।
विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यताम् ॥ १४॥

अक्षतान्धवलान्दिव्यान् शालीयानक्षतान् शुभान् ।
हरिद्राचूर्णसंयुक्तान् सङ्गृहाण गणाधिप ॥ १५॥

सुगन्धीनि सुपुष्पाणि जाजी कुन्दमुखानि च ।
एकविंशति सङ्ख्यानि गृहाण गणनायक ॥ १६॥

चन्दनागुरुकस्तूरीचन्द्रगुग्गुलुसंयुतम् ।
धूपं गृहाण वरद धूतपाप नमोऽस्तु ते ॥ १७॥

दीपं गृहाण देवेश वर्तित्रयसमन्वितम् ।
गणराज नमस्तुभ्यं अज्ञानं विनिवर्तय ॥ १८॥

शाल्यन्नं पायसादीनि मोदकाञ्च फलानि च ।
निवेदितं गृहाणेश नित्यतृप्त नमोऽस्तु ते ॥ १९॥

पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् ।
कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ २०॥

चन्द्रादित्यौ ग्रहास्ताराः विद्युदग्निर्विभास्वरम् ।
त्वमेव सर्वं तत्तेजो नीराजनमिदं प्रभो ॥ २१॥

नमो नमो गणेशाय नमस्ते विश्वरूपिणे ।
निर्विघ्नं कुरु मे कामं नमामि त्वां गजानन ॥ २२॥

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानां एकदन्तमुपास्महे ॥ २३॥

विनायक वरं देहि महात्मन्मोदकप्रिय ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ २४॥

यस्य स्मृत्या च नामोक्त्या तपः पूजा क्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे गजाननम् ॥ २५॥

इति सिद्धिविनायकषोडशोपचारपूजास्तुतिः (१) सम्पूर्णा ।

Proofread by Narendran Madathil

Siddhivinayaka Shodashopachara Pujastutih 1
pdf was typeset on October 10, 2026

Please send corrections to *sanskrit@cheerful.com*